# nArAyaNAShTottarashatanAmastotram

# નારાયણાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : nArAyaNAShTottarashatanAmastotram

File name : nArAyaNAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, vishhnu, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : January 19, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

nArAyaNAShTottarashatanAmastotram

# નારાયણાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

નારાયણાય સુરમણ્ડનમણ્ડનાય નારાયણાય સકલસ્થિતિકારણાય ।
નારાયણાય ભવભીતિનિવારણાય નારાયણાય પ્રભવાય નમો નમસ્તે ॥ ૧॥

નારાયણાય શતચન્દ્રનિભાનનાય નારાયણાય મણિકુણ્ડલધારણાય ।
નારાયણાય નિજભક્તપરાયણાય નારાયણાય સુભગાય નમો નમસ્તે ॥ ૨॥

નારાયણાય સુરલોકપ્રપોષકાય નારાયણાય ખલદુષ્ટવિનાશકાય ।
નારાયણાય દિતિપુત્રવિમર્દનાય નારાયણાય સુલભાય નમો નમસ્તે ॥ ૩॥

નારાયણાય રવિમણ્ડલસંસ્થિતાય નારાયણાય પરમાર્થપ્રદર્શનાય ।
નારાયણાય અતુલાય અતીન્દ્રિયાય નારાયણાય વિરજાય નમો નમસ્તે ॥ ૪॥

નારાયણાય રમણાય રમાવરાય નારાયણાય રસિકાય રસોત્સુકાય ।
નારાયણાય રજોવર્જિતનિર્મલાય નારાયણાય વરદાય નમો નમસ્તે ॥ ૫॥

નારાયણાય વરદાય મુરોત્તમાય નારાયણાય અખિલાન્તરસંસ્થિતાય ।
નારાયણાય ભયશોકવિવર્જિતાય નારાયણાય પ્રબલાય નમો નમસ્તે ॥ ૬॥

નારાયણાય નિગમાય નિરઞ્જનાય નારાયણાય ચ હરાય નરોત્તમાય ।
નારાયણાય કટિસૂત્રવિભૂષણાય નારાયણાય હરયે મહતે નમસ્તે ॥ ૭॥

વારાયણાય કટકાઙ્ગદભૂષણાય નારાયણાય મણિકૌસ્તુભશોભનાય ।
નારાયણાય તુલમૌક્તિકભૂષણાય નારાયણાય ચ યમાય નમો નમસ્તે ॥ ૮॥

નારાયણાય રવિકોટિપ્રતાપનાય નારાયણાય શશિકોટિસુશીતલાય ।
નારાયણાય યમકોટિદુરાસદાય નારાયણાય કરુણાય નમો નમસ્તે ॥ ૯॥

નારાયણાય મુકુટોજ્જ્વલસોજ્જ્વલાય નારાયણાય મણિનૂપુરભૂષણાય ।
નારાયણાય જ્વલિતાગ્નિશિખપ્રભાય નારાયણાય હરયે ગુરવે નમસ્તે ॥ ૧૦॥

નારાયણાય દશકણ્ઠવિમર્દનાય નારાયણાય વિનતાત્મજવાહનાય ।

નારાયણાય મણિકૌસ્તુભભૂષણાય નારાયણાય પરમાય નમો નમસ્તે ॥ ૧૧॥

નારાયણાય વિદુરાય ચ માધવાય નારાયણાય કમઠાય મહીધરાય ।
નારાયણાય ઉરગાધિપમઞ્ચકાય નારાયણાય વિરજાપતયે નમસ્તે ॥ ૧૨॥

નારાયણાય રવિકોટિસમામ્બરાય નારાયણાય ચ હરાય મનોહરાય ।
નારાયણાય નિજધર્મપ્રતિષ્ઠિતાય નારાયણાય ચ મખાય નમો નમસ્તે ॥ ૧૩॥

નારાયણાય ભવરોગરસાયનાય નારાયણાય શિવચાપપ્રતોટનાય ।
નારાયણાય નિજવાનરજીવનાય નારાયણાય સુભુજાય નમો નમસ્તે ॥ ૧૪॥

નારાયણાય સુરથાય સુહૃચ્છ્રિતાય નારાયણાય કુશલાય ધુરન્ધરાય ।
નારાયણાય ગજપાશવિમોક્ષણાય નારાયણાય જનકાય નમો નમસ્તે ॥ ૧૫॥

નારાયણાય નિજભૃત્યપ્રપોષકાય નારાયણાય શરણાગતપઞ્જરાય ।
નારાયણાય પુરુષાય પુરાતનાય નારાયણાય સુપથાય નમો નમસ્તે ॥ ૧૬॥

નારાયણાય મણિસ્વાસનસંસ્થિતાય નારાયણાય શતવીર્યશતાનનાય ।
નારાયણાય પવનાય ચ કેશવાય નારાયણાય રવિભાય નમો નમસ્તે ॥ ૧૭॥

શ્રિયઃપતિર્યજ્ઞપતિઃ પ્રજાપતિર્ધિયામ્પતિર્લોકપતિર્ધરાપતિઃ ।
પતિર્ગતિશ્ચાન્ધકવૃષ્ણિસાત્ત્વતાં પ્રસીદતાં મે ભગવાન્ સતામ્પતિઃ ॥ ૧૮॥

ત્રિભુવનકમનં  તમાલવર્ણં રવિકરગૌરવરામ્બરં દધાને ।
વપુરલકકુલાવૃતાનનાબ્જં વિજયસખે રતિરસ્તુ મેઽનવદ્યા ॥ ૧૯॥

અષ્ટોત્તરાધિકશતાનિ સુકોમલાનિ નામાનિ યે સુકૃતિનઃ સતતં સ્મરન્તિ ।
તેઽનેકજન્મકૃતપાપચયાદ્વિમુક્તા નારાયણેઽવ્યવહિતાં ગતિમાપ્નુવન્તિ ॥ ૨૦॥

ઇતિ નારાયણાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*nArAyaNAShTottarashatanAmastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*